हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ वसन्त-ऋतुः सूर्यः उत्तरायणः फाल्गुणः शुक्ल चतुर्दशी तिथिः फाल्गुणः 30 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-133 | 1 | मार्च 13, 2025 | Webs|te- www.h|msanskr|tam.com Ema|l-h|msanskr|t@gma|l.com

2 HP Vidhansabha Budget Session: मन्दिराणां दानद्रव्ये तप्तं सदनम्, आक्रामकौ दृष्टौ पक्षविपक्षौ

3 भारतीयभाषाः अस्माकं गौरवपूर्णाः न्यासाः - वंदना खुशलानी

4 कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य महिलाशाखायाः पक्षतः स्वास्थ्यं, मधुमेहः दन्तपरीक्षा शिविरस्य चायोजनम्

## मारीशस्-देशस्य राष्ट्रियदिवसस्य समारोहे मुख्यातिथिरूपेण भागं गृहीतवान् प्रधानमन्त्री मोदीग्रैण्ड-कमाण्डर्-आफ्-द-आर्डर्-आफ्-द-स्टार् तथा च की-आफु-द-इण्डियन्-ओशन् उपाधिभ्यां सम्मानितः



**हिमसंस्कृतवार्ताः।** प्रधानमन्त्री श्रीनरेन्द्रमोदी मॉरीशस्-देशस्य चैम्प-डी-मार्स इत्यत्र आयोजिते मारीशस्-देशस्य राष्ट्रियदिवसस्य समारोहे मुख्यातिथिरूपेण भागं गृहीतवान्। समारोहावधौ, मॉरिशस्-देशस्य राष्ट्रपतिः धरमबीर-गोखुलः भारत-मॉरिशस्-सहभागितायां श्रीमोदिनः उत्कृष्ट-योगदानाय तस्मै ग्रैण्ड-कमाण्डर्-आफ्-द-आर्डर्-आफ्-द-स्टार् तथा च की-आफु-द-इण्डियन्-ओशन् इत्येताभ्याम् उपाधिभ्यां सम्मानितवान्। प्रधानमन्त्री मोदी प्रथमः भारतीयः अस्ति, यः मॉरिशस्-देशस्य सर्वोच्च नागरिकपुरस्कारं प्राप्तवान्। मॉरिशस्-देशस्य राष्ट्रिय-दिवसोत्सवस्य पथसञ्चलने भारतीय-नौसेनायाः दलमेकमपि भागम् अगृह्णात्। प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वीय द्विदिवसीयाधिकारिकयात्रायाः अन्तर्गतं मारिशस्-देशस्य प्रधानमन्त्रिणा नवीन-रामगुलामेन सह प्रतिनिधिस्तरीय वार्ता कृता। यात्रायाः द्वितीये दिवसे भारत-मारीशस्-देशयोः मध्ये अनेकेषु सन्धिपत्रेषु हस्ताक्षराणि कृतानि। उपवेशनावधौ स्थानीय-मुद्रा-समाधान-व्यवस्था, ऋण-सौविध्य-सन्धयः, राजनयिकेभ्यः प्रशिक्षण-कार्यक्रमः, श्वेत-नौवहन-सूचना-आदानप्रदानम्, वित्तीयापराधानां प्रतिरोधः, सूक्ष्मलघु-मध्यमोद्योग-क्षेत्रे सहयोगः, सुशासनार्थंसार्वजनिका-धिकारिणां प्रशिक्षणम् इत्यादिषु सम्बद्धविषयेषु अष्ट Mou इति सन्धि-ज्ञापन-पत्राणां तथा च सन्धीनां आदानप्रदानं सञ्जातम्। एकस्मिन् संयुक्त-वार्ताहर-सम्मेलने स्वीय वक्तव्ये, प्रधानमन्त्री भारतस्य क्षेत्रीय-कार्यनीतौ मारिशस्-देशस्य महत्त्वं प्रकाशितवान्, यस्मिन् वैश्विक दक्षिणक्षेत्रे, हिन्दमहासागरे, अफ्रीका महाद्वीपे च मॉरिशस्-देशस्य महत्त्वपूर्ण-भूमिकायै बलं प्रदत्तवान्। अस्मिन् अवसरे, असौ क्षेत्रीयस्थिरतां समृद्धिं च प्रति भारतस्य प्रतिबद्धतायाः विषये अवदत्। सः अवदत् यत् उभौ देशौ न केवलं हिन्दमहासागरेण अपितु परम्परया संस्कृत्या च सम्बद्धौ स्तः। एकस्य नूतनोपक्रमस्य अनावरणं कुर्वन्, श्रीमोदी अघोषयत् यत्, "वैश्विक-दक्षिणाय अस्माकं दृष्टिः भविष्यति महासागरसुरक्षा, तथा च सर्वेषु क्षेत्रेषु विकासाय परस्पर-समग्र-प्रगतिः"। अस्य अन्तर्गतं विकासाय व्यापारः, सततविकासाय क्षमता-निर्माणम्, सहभागि भविष्याय परस्पर-सुरक्षा च सम्मिलिताः भविष्यन्ति। घोषणैषा मॉरिशस् देशेन सह भारतस्य दीर्घकालीन-सम्बन्धाय, क्षेत्रीयसहयोगाय विकासाय च व्यापकदृष्टेः पुष्टि करोति । प्रधानमन्त्री श्रीनरेन्द्रमोदी अवदत् यत् भारत-मारिशस्-देशाभ्यां स्वसहभागित्वम् उन्नत-रणनीतिक-सहभागि-स्तरं प्रति वर्धयितुं निर्णयः कृतः। सामाजिक सञ्चार-पटले एकस्मिन् सन्देशे प्रधानमन्त्रिणा कथितं यत् मॉरिशस्-देशस्य राष्ट्रिय-दिवसस्य विशेषावसरे मॉरिशस्-देशस्य स्वीय समकक्षीयेन नवीनचन्द्र-रामगुलामेन सह मेलनस्य अवसरः प्राप्तः। श्रीमोदी अवदत् यत् उपवेशने उभयपक्षाभ्यां भारत-मॉरिशस्-सम्बन्धानां सम्पूर्णविषयेषु चर्चा जाता। असौ अवदत् यत् आधारभूत-संरचना, आवासः, आङ्किकीय-प्रौद्योगिकी, स्वास्थ्यम् च इत्यादिषु क्षेत्रेषु सहयोगस्य मार्गाणाम् अन्वेषणं जातम्। मॉरिशस्-देशस्य सर्वोच्चं राष्ट्रियपुरस्कारं प्राप्ते सति प्रधानमन्त्री आभारं प्रकटितवान्। असौ एनं पुरस्कारं भारतस्य चत्वारिंशदधिकैकशत-कोटिजनानां कृते, उभयदेशयोः मध्ये युगानुयुगे मैत्रीं प्रति च समर्पितवान्।

### प्रधानमन्त्रिणा दण्डीमार्च इत्यस्मिन् भागं गृहीतेभ्यः सर्वेभ्यः महाजनेभ्यः श्रद्धाञ्जलिः समर्पिता

प्रधानमन्त्रिणा नरेन्द्रमोदिना ऐतिहासिक-दण्डीमार्च इत्यस्मिन् भागं गृहीतेभ्यः सर्वेभ्यः महाजनेभ्यः श्रद्धाञ्जलिः समर्पिता। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे श्रीमोदी अवदत् यत् महात्मगान्धिनः नेतृत्वे यात्रया आत्मनिर्भरतायाः स्वातन्त्र्यस्य च कृते राष्ट्रव्यापि-आन्दोलनस्य अग्निः प्रज्वलितम्। प्रधानमन्त्रिणा उक्तं यत् दाण्डी-यात्रान्दोलने भागं गृहीतानां सर्वेषां साहस-त्यागयोः, सत्याहिंसयोः च प्रतिबद्धता जनान् निरन्तरं प्रेरयन्ति ।

## सुभाषितम्

**स जीवति गुणा यस्य धर्मो यस्य स जीवति।**
**गुणधर्मविहीनो यो निष्फलं तस्य जीवनम्।।**

जो गुणवान और धार्मिक है वही जीवित है, जो गुण और धर्म से रहित है उसका जीवन निष्फल है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः

**हिमसंस्कृतम् प्रकाशनम्**

जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र. पत्रव्यवहारसङ्केतः - १७७१११

## बलूचिस्तानस्य कच्छीजनपदे सप्तविंशतिः आतङ्कवादिनः मृत्युमुपगताः



पाकिस्तानदेशे, बलूच-लिबरेशन्-आर्मी इत्यस्य आतङ्किभिः बलूचिस्तानस्य कच्छीजनपदे चतुः शततोप्यधिकान् यात्रिणः वहन्ती रेलयानस्य अपहरणादनन्तरं सुरक्षासैनिकाः पञ्चाशदधिकैक-शततोप्यधिकान् बन्धकान् रक्षितवन्तः। सुरक्षाभियाने साम्प्रतं यावत्, जाफर् एक्स्प्रेस्-रेलयानस्य अपहरणे संलग्नाः सप्तविंशतिः आतङ्कवादिनः मृत्युमुपगताः। आतङ्किभिः सह सङ्घर्षस्य अनन्तरं सुरक्षासैनिकाः बन्धकान् रक्षितुं समर्थाः जाताः। उद्धारकार्याणि प्रचलन्ति, प्रतिवेदनानि सूचयन्ति यत् आत्मघाति-विस्फोटकाः केचन बन्धकान् गृहीतवन्तः।सूचनानुगुणं चत्वारिंशत् बन्धकाः मृत्युमुपगताः।

## नवदिल्ल्यां गङ्गासंरक्षणविषये सशक्त-कार्यदलस्य चतुर्दशोपवेशनम्

केन्द्रीय-जलशक्ति-मन्त्री सी.आर्.पाटिलः एकीकृत-प्रौद्योगिकी-चालित-दृष्टेः माध्यमेन गङ्गानदीं स्वच्छतरम्, अधिकस्थायिं च कर्तुं प्रशासनस्य प्रतिबद्धतायाः पुष्टिं कृतवान्। नवदिल्ल्यां गङ्गासंरक्षणविषये सशक्त-कार्यदलस्य चतुर्दशोपवेशनस्य अध्यक्षतां कुर्वन् श्रीपाटिलः परियोजनानां समयबद्ध-निष्पादनस्य, सुदृढप्रदूषण-नियन्त्रणोपायानाम्, अन्तामन्त्रालय-समन्वयस्य च सम्वर्धनाय आवश्यकतायै बलं दत्तवान्। अस्मिन् सत्रे विभिन्न-मन्त्रालयानां राज्यप्रशासनानां च प्रमुखाः हितधारकाः एकत्रिताः आसन्। केन्द्रीयजलशक्ति राज्यमन्त्रिणा राजभूषणचौधरी इत्यनेनापि सम्मेलने भागः गृहीतः।

## देहल्याम् अवैध-बाङ्गलादेशीय-प्रवासीनां विरुद्धम् अभियानम् प्रारब्धम्




दिल्ल्यारक्षि-बलम् अवैध-बाङ्गलादेशीय-प्रवासीनां विरुद्धम् अभियानम् प्रचालयति। दक्षिणपूर्व-दिल्ल्यां दक्षिणदिल्ल्यां च एकस्याभियानस्यावधौ आरक्षिबलेन अवैधरूपेण देशे प्रविष्टाः द्वादशतोप्यधिकाः बाङ्गलादेशीय-नागरिकाः निगडिताः।

## भारतऋतु-विज्ञानविभागः

भारतऋतुविज्ञानविभागेन पश्चिमराजस्थान-गुजरातयोः विभिन्नेषु स्थानेषु ताप-तरङ्गस्य पूर्वानुमानं प्रकटितम्।ऋतुविज्ञानविभागे न उक्तं यत् कोङ्कण-गोवा-तटीयकर्नाटकेषु उष्ण-आर्द्र-वायोः प्रवाहस्य सम्भावना विद्यते। जम्मू-कश्मीरे हिमाचलप्रदेशस्य पश्चिमभागे च विद्युद्योतनादि क्रियाकलापानाम् आरम्भस्य सम्भावना वर्तते।

## HP Vidhansabha Budget Session: मन्दिराणां दानद्रव्ये तप्तं सदनम्, आक्रामकौ दृष्टौ पक्षविपक्षौ




हिमसंस्कृतवार्ताः- शिमला
बजटसत्रस्य तृतीयदिने सदने मन्दिरेभ्यः धनं ग्रहीतुं उच्चैः प्रतिध्वनिः अभवत्। विधायकः रणधीरः शर्मा इत्यनेन भाजपापक्षतः एषः विषयः उत्थापितः, उपमुख्यमन्त्री मुकेश अग्निहोत्री सत्ताधारीपक्षतः प्रतिक्रियाम् अददत्। उपमुख्यमन्त्री पूर्वभाजपासर्वकारकाले मन्दिरन्यासात् धनग्रहणस्य विषये अपि चर्चां कृतवान्। अस्य उत्तरं दातुं विपक्षस्य नेता जयरामठाकुरः अपि सज्जः अभवत्। मन्दिरस्य अधीने प्रचलति गोशालायाः कृते १५ प्रतिशतं यावत् धनं प्रदातुं भाजपायाः चर्चा कृता इति सः अवदत्। यत्र सुखाश्रययोजना राज्यसर्वकारेण बजटप्रावधानेन सह आरब्धा। रणधीरशर्मा अपि सदने नाबार्ड इत्यस्मिन् निविदानिवृत्तेः विषये उक्तवान्, एतेषां सर्वेषां प्रश्नानाम् उत्तरं उपमुख्यमन्त्री मुकेश अग्निहोत्री इत्यनेन दत्तम्। बुधवासरे यदा विधायकः संजय अवस्थी सभां सम्बोधयति स्म तदा सदने बहु कोलाहलः अभवत्। सः रेलवे-इत्यस्य ५०० कोटिरुप्यकाणां निवेशस्य विषये वित्तकोषेषु म्युचुअल फण्ड इत्यत्र च स्थापयितुं चर्चां कृतवान्। अस्मिन् विषये विपक्षः कोलाहलं जनयति स्म। विपक्षः नामप्रकाशनस्य विषये कथितवान्। एतस्य प्रतिक्रियारूपेण विधायकः विपिन परमारः अवदत् यत् यदि भवतः सर्वकारः अस्ति, घोटाला च अभवत् तर्हि प्रकरणस्य अन्वेषणस्य आदेशः दातव्यः। यदि तथ्यानि सन्ति तर्हि सदने प्रस्तोतव्याः अन्यथा सदनस्य कार्यविधितः शब्दाः अपसारिताः भवेयुः। पूर्वसर्वकारेण कर्मचारिणः घोषान् उत्थापयितुं प्रेरिताः आसन्।

## हिमाचलप्रदेशस्य विद्यालयेषु अन्तर्जाल-पत्रस्य स्थाने वैध-जन्मप्रमाणपत्रस्य आधारे अपि प्रवेशः लभ्यते,प्रारम्भिक-शिक्षा- निदेशालयेन निर्देशाः दत्ताः



हिमसंस्कृतवार्ताः - डॉ पद्मनाभः।
शिमला। हिमाचलप्रदेशस्य विद्यालयेषु अन्तर्जाल-पत्रस्य स्थाने वैध-जन्मप्रमाणपत्रस्य आधारे प्रवेशः लभ्यते। अन्यराज्येभ्यः आगच्छतां छात्राणां विद्यालय-प्रवेशे उत्पन्नं कठिनतां परिगण्य प्रारम्भिक-शिक्षा-निदेशालयेन एषा व्यवस्था प्रदत्ता। प्रसारित-पत्रे प्रारम्भिक-शिक्षा-निदेशकः आशीषः कोहली इत्युक्तवान् यत्, चिकित्सालयेषु, आंगनवाडी-केन्द्रेषु, नर्सरी-उपस्थितेः अभिलेखाः अथवा मातृ-पितृ-घोषणापत्राणि अपि प्रवेशार्थं मान्याः भविष्यन्ति।
शिक्षा-निदेशालयेन सर्वेभ्यः जिला-उपनिदेशकेभ्यः प्रेषिते पत्रे उक्तं यत्, विद्यालयेषु प्रवेश-प्रक्रियायाम् अन्तर्जालम् (ऑनलाइन)-जन्मप्रमाणपत्रस्य (फॉर्म संख्या ५) स्वीकृतेः विषये काचित् शंका अस्ति। अयं विषयः क्षेत्रीय-कार्यालयेभ्यः बहुशः प्राप्तप्रतिनिधित्वात् प्रकटः जातः। राज्ये बहिः स्थिताः छात्राः एतं विशेषं अन्तर्जालम्-दस्तावेजं प्रस्तोतुं अशक्ताः सन्ति, येन कारणेन प्रवेश-प्रक्रियायां जटिलता विलम्बश्च जायते।
निदेशालयेन १५ फरवरी २०२५ तमे वर्षे प्रेषितं पुरातनं पत्रं निरस्तं कृत्वा एवं निरूपितं यत् अन्तर्जाल-जन्मप्रमाणपत्रं आवश्यकं अभिलेखः(दस्तावेजं) अस्ति, किन्तु तस्य अभावे छात्राणां प्रवेशे बाधा न भविष्यति। शिक्षा-अधिकार-अधिनियमः (आरटीई) २००९ तथा हिमाचलप्रदेश-आरटीई-नियमाः २०११ अनुसारं, जन्मप्रमाणपत्रस्य अभावे कोऽपि छात्रः प्रवेशात् वञ्चितः न भविष्यति। आरटीई अधिनियमस्य धारा १४ अनुसारं, बालस्य आयुः जन्म-मृत्यु-विवाह-पंजीकरण अधिनियमः १८८६ इत्यस्मिन् निर्दिष्टेन वैध-जन्मप्रमाणपत्रेन निर्धारितव्या। यदि छात्रः एतादृशं प्रमाणपत्रं प्रदातुं अशक्तः भवति, तर्हि अन्यानि अभिलेखानि अपि वैध-आयु-प्रमाणरूपेण स्वीकर्तुं विधिना अनुमताः। निदेशालयेन सर्वेषु विद्यालयेषु एतेषु निर्देशेषु पालने आग्रहः कृतः यथा छात्राणां नामांकनं निर्बाधं भवति, विशेषतः अन्यराज्येभ्यः आगच्छतां छात्राणां सुगमः प्रवेशः सुनिश्चितं भवति।

## मुख्यमंत्री सुक्खुः १७ मार्च दिनाङ्के प्रातः ११ वादने आय-व्ययकं प्रस्तोस्यति, १५ मार्च दिनाङ्के विधानसभासभा न भविष्यति




हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अधुना १७ मार्च दिनाङ्के प्रातः ११ वादने आय-व्ययकं प्रस्तोस्यति। पूर्वं २ वादने प्रस्तोतुं प्रस्तावितं आसीत्। १५ मार्च दिनाङ्के विधानसभा न भविष्यति। कार्यपरामर्शसमित्याः सभायां एषः निर्णयः कृतः अस्ति।
व्यावसायिकपरामर्शदातृसमित्याः सभायाः अध्यक्षतां कृत्वा विधानसभाध्यक्षः कुलदीपसिंहपठानिया अवदत् यत् व्यापारपरामर्शसमित्याः अनुशंसया बजटसत्रस्य कृते निर्गतपञ्चाङ्गे आंशिकपरिवर्तनं कृतम् अस्ति। अधुना १५ मार्च दिनाङ्के सत्रसमागमः न भविष्यति। पठानिया उक्तवान् यत् अधुना मार्चमासस्य १४, १५, १६ दिनाङ्केषु कोऽपि समागमः न भविष्यति, यदा तु मार्च १७ दिनाङ्के २०२५-२०२६ वित्तवर्षस्य आय-व्ययकस्य अनुमानं मुख्यमन्त्री अपराह्णे २:०० वादनस्य स्थाने प्रातः ११:०० वादने सदने प्रस्तुतं करिष्यति। पठानिया उक्तवान् यत् १५ मार्च दिनाङ्के अधिवेशनं न करणीयम्, १७ मार्च दिनाङ्के अपराह्णे २:०० वादनस्य स्थाने ११:०० वादने बजटं प्रस्तुतं करणीयम् इति प्रस्तावः संसदीयकार्याणां मन्त्रिणा सर्वकारस्य पक्षतः आनीतः, यस्य कृते विपक्षेण अपि सहमतिः दत्ता अस्ति। समित्यां समागमे संसदीयः कार्यवाहमंत्री हर्षवर्धनचौहानः, विपक्षस्य नेता जयरामठाकुरः, हिमाचलप्रदेशसर्वकारस्य उपमुख्यसचेतकः केवलसिंहः पठानिया, सदस्यः सुखरामः चौधरी व सदस्यः विनोदकुमारः च उपस्थिता अभवन्।

## *HPCM - तथ्याधारेण सदने उत्तरं दास्यते, विपक्षेण बहिः न गन्तव्यम् मुख्यमंत्री सुजानपुरे होलीमेलापकस्य शुभारम्भमकरोत्*

*हिमसंस्कृतवार्ताः - हमीरपुरम्।*
गुरुवासरे सदनस्य तथ्याधारितं प्रत्येकं उत्तरं विपक्षीदलं प्राप्स्यति। विपक्षेण बहिः न गन्तव्यम्। विपक्षनेता पूर्वमुख्यमन्त्री जयरामठाकुरः विधानसभायाः अन्तः तथ्येषु वदेत्। सर्वे तस्य वचनं श्रृण्वन्ति। तस्य मतानाम् उत्तरं तथ्याधारितं भविष्यति। विरोधं कर्तुं विपक्षस्य अधिकारः अस्ति, परन्तु गुरुवासरे सः विपक्षस्य प्रत्येकस्य प्रश्नस्य उत्तरं सदने दास्यति। एतादृशे सति विपक्षेण बहिः न गन्तव्यम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सुजानपुरे राष्ट्रियस्तरस्य होलीमहोत्सवस्य उद्घाटनानन्तरं पत्रकारैः प्रश्नस्य उत्तरे उक्तवान्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मुख्यातिथिरूपेण होली महोत्सवस्य शोभायात्रायां भागं गृहीतवान् । सः रियासतयुगस्य मुरलीमनोहरमन्दिरस्य प्रार्थनां कृत्वा मार्चमासस्य १२ दिनाङ्कात् १५ दिनाङ्कपर्यन्तं आयोजितस्य होलीमहोत्सवस्य उद्घाटनं कृतवान् । तदनन्तरं सः मीडियाव्यक्तिभिः सह मिलितवान् । विपक्षस्य वॉकआउट-इत्यस्य प्रश्ने मुख्यमंत्री सुक्खुः





अवदत् यत् धर्मशालाविधानसभासत्रे भाजपया सर्वदलीयसभायाः बहिष्कारः कृतः। अधुना शिमलानगरे भाजपाविधायकाः अस्मिन् सत्रे सम्मिलिताः सन्ति। ईश्वरः तेभ्यः प्रज्ञां दत्तवान्। भाजपायाः विरोधं कर्तुं कोऽपि न निवारयति। राज्यस्य काङ्ग्रेससर्वकारः प्रत्येकस्य वर्गस्य हिताय निर्णयान् गृह्णाति। बहुवारं संचारस्य अभावात् समन्वयः न भवति किन्तु एकत्र उपविश्य चर्चां कृत्वा विषयस्य समाधानं कर्तुं शक्यते। सः अवदत् यत् सुजानपुर होली उत्सवः न केवलं राज्ये अपितु सम्पूर्णे देशे प्रसिद्धः अस्ति। होली-उत्सवस्य परम्परा शताब्दपुरातना अस्ति । अयं वर्णपर्वः राज्यस्य देशस्य च जनानां जीवने सुखं जनयतु। एकस्य प्रश्नस्य उत्तरे सः अवदत् यत् गुरुवासरे सैनिकविद्यालयं सुजानपुरं गमिष्यामि इति। एषः विद्यालयः केन्द्रसर्वकारस्य रक्षामन्त्रालयेन चालितं किन्तु राज्यसर्वकारस्य पक्षतः अपि विद्यालयाय अनुदानं दीयते। अस्मिन् विद्यालये देशाय राज्याय च ४०० तः अधिकाः अधिकारिणः दत्ताः सन्ति । विद्यालयप्रबन्धनेन अहम् आमन्त्रितः। बालकानां हिताय यत्किमपि सम्भवं साहाय्यं निर्णयं च क्रियते।

# भारतीयभाषाः अस्माकं गौरवपूर्णाः न्यासाः - वंदना खुशलानी

# संस्कृत-सिन्धी शब्दकोशः निर्मातव्यः - प्रो. हरेरामः त्रिपाठी






**हिमसंस्कृतवार्ताः - नागपुरम्।**

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य शिक्षाविभागेन आधुनिकभाषाविभागेन भारतसर्वकारस्य राष्ट्रियसिन्धीभाषा-विकासपरिषद्द्वारा च सिन्धीभाषाविषये १२ मार्च २०२५ दिनाङ्के एकदिवसीयसंगोष्ठी आयोजिता। अस्याः संगोष्ठ्याः वित्तीय-अनुदानं राष्ट्रियसिन्धीभाषाविकासपरिषदः प्राप्तम् अस्ति । अस्याः संगोष्ठ्याः अध्यक्षता कुलपतिः प्रो. हरेरामः त्रिपाठी अकरोत्। मुख्यवक्ता डॉ. वंदना खुशलानी कार्यकारिणसमित्या सदस्या राष्ट्रीय सिंधीभाषाविकास -परिषद एवं पूर्वप्राचार्या दयानंद आर्य कन्यामहाविद्यालयः आसीत्। कार्यक्रमस्य संयोजकः शिक्षाविभागस्य अध्यक्षः डॉ. ऋषिकेशदलाईः स्वपरिचये उक्तवान् यत् भारतीयभाषाणां समृद्धन्यासं उल्लिख्य भगिनीभाषाणां मध्ये अस्य आदानप्रदानस्य प्रचारार्थं एषा संगोष्ठी आयोजिता। सर्वप्रथमं प्राध्यापकः परागजोशी भारतीयभाषामातुः संस्कृतस्य वैशिष्ट्यं, महत्त्वं, योगदानं च प्रकाशितवान् । ज्ञानं, विज्ञानं, दर्शनं च इति त्रयोऽपि दृष्ट्या संस्कृतभाषा महत्त्वपूर्णा अस्ति । संस्कृतव्याकरणं सर्वस्वीक्रियते, तस्य अनुशासनात् पञ्चवर्षसहस्रपूर्वं यथा आसीत् तथा वेदाः अद्यत्वे उपलभ्यन्ते । संस्कृतस्य भाषाविशेषणात् मध्ययुगे भारत-यूरोपीयभाषापरिवारे अस्य समावेशः अभवत् । सिन्धप्रान्तस्य कारणात् सिन्धी-संस्कृतयोः निकटभाषिकसम्बन्धः अस्ति । भाषाविनिमयद्वारा एव भाषाः समृद्धाः भवन्तिमराठीभाषायाः एवं सिंधीभाषायाः सम्बन्धः प्रो. ललिताचंद्रात्रे अबोधयत्। मराठीभाषा मराठीजनानाम् मातृभाषा अस्ति, यथा सिन्धीभाषा सिन्धप्रान्तस्य जनानां मातृभाषा अस्ति । विभाजनकाले सिन्धप्रान्तस्य जनानां उपरि कृताः अत्याचाराः न केवलं अमानवीयाः आसन् अपितु तेषां भाषा, संस्कृतिः, साहित्यं च संकटग्रस्तम् आसीत् । सिन्धीभाषिणः भारते परे च प्रसृताः सन्ति, तेषां साहित्यं लोककथा च समृद्धा अस्ति । डॉ. चंद्रात्रे अकथयत् यत् एताः भाषाविदः भगिन्यः सर्वदा सम्बद्धाः सन्ति। एतादृशाः कार्यक्रमाः तयोः सम्बन्धं अधिकं सुदृढं करिष्यन्ति अतः एतादृशाः कार्यक्रमाः निरन्तरं भवेयुः । मुख्यवक्त्री डॉ. वन्दना खुशलानी स्वभाषणे उक्तवती यत्, “अस्माकं मातृभाषा, मातृभूमिं च प्रति विशेषभावनाः सन्ति” इति। तस्य ऋणं वयं कदापि परिशोधयितुं न शक्नुमः। सिन्धी मम मातृभाषा अस्ति। अहं विशेषतया प्रसन्ना अस्मि यत् संस्कृतविश्वविद्यालयेन एतस्य संगोष्ठ्याः आयोजनस्य उपक्रमः कृतः। भारतीयभाषाः अस्माकं समृद्धा गौरवपूर्णा च न्यासाः सन्ति; तस्य रक्षणं अस्माकं कर्तव्यम् अस्ति। अद्य विश्वे सिन्धीभाषिणः जनाः सन्ति, परन्तु अस्माकं सिन्धीमहिलाभ्यः अहं आह्वानं करोमि यत् ते स्वसन्ततिभिः सह केवलं स्वमातृभाषायां सिन्धीभाषायां वार्तालापं कुर्वन्तु, तदा एव एषा भाषा जीवति। यद्यपि विभाजनस्य कारणेन सिन्धीजनाः स्वमातृभूमितः विरक्ताः आसन् तथापि ते साहसिकाः सन्ति; तत्र शरणार्थिनः न सन्ति। अद्यत्वे कथं व्यापारः करणीयः ? सः सिन्धीजनेभ्यः अशिक्षयत्, ये जनाः धैर्यपूर्वकं कार्यं कर्तुं शिक्षितुं इच्छन्ति तेषां कृते उदाहरणं स्थापितवान् । अस्याः संगोष्ठ्याः आयोजनार्थं कुलपतिं धन्यवादं ददामि। अध्यक्षीमसम्बोधने कुलपतिः प्रो. हरेरामः त्रिपाठी सिन्धीक्षेत्रस्य भाषायाश्च इतिहासस्य परिवर्तनस्य च विषये उक्तवान् । संस्कृतं प्रायः सर्वेषां भाषाणां जननी अस्ति । संस्कृततः उत्पन्नानां भाषाणां मध्ये सामञ्जस्यं प्रवर्धयितुं तेषां साहित्यस्य आनन्दं प्राप्तुं च एतत् आयोजनं आयोजितम् अस्ति । सिन्धी इति सिन्धप्रान्तस्य भाषा । संस्कृतसिन्धीकोशानां निर्माणं कर्तव्यम्। भाषायाः विकासः निरन्तरप्रक्रिया अस्ति, कालान्तरे अनेके शब्दाः तस्मिन् योजिताः भवन्ति । महाराष्ट्रस्य अजमेरः, गुजरातः, जलग्रामः, उल्हासनगरं, नागपुरम् इत्यादिषु भारतीयराज्येषु सिन्धीभाषिणः जनाः बहुसंख्यायां निवसन्ति । अस्मिन् अवसरे कुलपतिः अपि कामितवान् यत् संस्कृत-सिन्धी-इत्येतयोः सामञ्जस्यः सदैव वर्धमानः भवेत् ।

कार्यक्रमस्य संचालनं मराठी प्राध्यापकः डॉ. माधवी पाटिल तथा प्रो. भारत मिसाल इत्येताभ्यां कृतम् एतत् विचारितम् । श्रीमती मोहिनी इत्यनया सिन्धीभाषायाः स्तुतिरूपेण गीतं प्रस्तुतम्।

# CM Sukhu- हमीरपुरमहाविद्यालये एमबीए, एमसीए, एम. ए. इतिहासः, राजनीतिविज्ञानम् इति पाठ्यक्रमाः आरब्धाः भविष्यन्ति

**हिमसंस्कृतवार्ताः- हमीरपुरम्।**

मुख्यमंत्री सुखविंदरसिंहसुक्खुः नेताजी सुभाषचन्द्रबोसस्मृति- महाविद्यालयस्य हमीरपुरस्य वार्षिकसमारोहस्य अध्यक्षतां कुर्वन् अकथयत् यत् अग्रिमसत्रात् इतिहासस्य, राजनीतिविज्ञानस्य च स्नातकोत्तरपाठ्यक्रमैः साकमेव महाविद्यालये एमबीए, एमसीए पाठ्यक्रमाः चापि आरब्धाः भविष्यन्ति। सः महाविद्यालयस्य कृत्रिमपट्टिकायाः पुनर्स्थापनं कृत्वा १०० बालिकानां कृते छात्रावासस्य निर्माणं कर्तुं घोषितवान्। सः अवदत् यत् हमीरपुरे सहशैक्षिक- सर्वकारीय- वरिष्ठ- माध्यमिक- विद्यालयस्य आरम्भः भविष्यति, तस्य विकासः राजीवगान्धी राजकीय आदर्शदिवस- बोर्डिंगविद्यालयरूपेण भविष्यति। सः अवदत् यत् आगामिवर्षात् नादौन- भोरञ्ज- नगरयोः राजीवगान्धी- सर्वकारीय- आदर्श- दिवस- आवास- विद्यालयौ आरभ्येते, शेषेषु विधानसभाक्षेत्रेषु अपि दिवस- आवास- विद्यालयाः उद्घाटिताः सन्ति। मुख्यमन्त्री उक्तवान् यत् छात्राणां सुविधायै स्मार्टकक्षागृहाणि निर्मीयन्ते। मुख्यमंत्री डैशबोर्डद्वारा शिक्षाविभागसहितस्य प्रत्येकस्य विभागस्य निरीक्षणं क्रियते। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः विगतमासद्वयात् सम्पूर्णे राज्ये मादकद्रव्यस्य दुरुपयोगविरुद्धं अभियानं चालयति, मादकद्रव्यस्य दुरुपयोगस्य विरुद्धं शून्यसहिष्णुतानीतिं च स्वीकृतवान्। मादकद्रव्यतस्करविरुद्धं कठोरकार्याणि क्रियन्ते। वर्तमानराज्यसर्वकारः युनः मादकद्रव्यस्य दलदले न पतेयुः इति सर्वं सम्भवं पदानि गृह्णाति। मुख्यमन्त्री उक्तवान्– अहं साधारणपरिवारात् आगत्य मुख्यमन्त्रीपदं प्राप्तवान्। अत एव अहं तेषां वर्गानां कृते कार्यं करोमि ये स्वरं उत्थापयितुं न शक्नुवन्ति। मुख्यमन्त्रीत्वस्य शपथग्रहणानन्तरं सः अनाथकन्याभिः सह मिलितुं टूटीकण्डी बालिकाश्रमं गतवान्। प्रथमः निर्देशः दत्तः यत् मातापितरौ त्यक्तवन्तः बालकाः तेषां आत्मविश्वासं



वर्धयितव्यम् इति। अतः राज्यसर्वकारेण एतेषां बालकानां हितस्य रक्षणार्थं देशे प्रथमं विधानं निर्मितम्, यस्मिन् तेषां परिचर्यायाः दायित्वं राज्यसर्वकारे एव अस्ति। एतत् एव न, मुख्यमन्त्री सुखशिक्षायोजना विधवाबालानां निःशुल्कशिक्षाप्रदानार्थम् आरब्धा अस्ति।

# KKSU : कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य

## महिलाशाखायाः पक्षतः स्वास्थ्यं, मधुमेहः दन्तपरीक्षा शिबिरस्य चायोजनम्



**हिमसंस्कृतवार्ताः - नागपुरम्।**
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य महिलाप्रकोष्ठ-एवं अन्तर्गत-तक्रार-समित्याः सहकारेण सर्वेषां कर्मचारिणां कृते स्वास्थ्य-मधुमेह-दन्तपरीक्षा-शिबिरस्य आयोजनं कृतम् । महिलाविभागस्य समन्वयिका डॉ. राजश्रीमेश्रामः स्वस्य परिचये अवदत् यत् विश्वविद्यालयस्य कर्मचारिणां स्वास्थ्यजागरूकतां वर्धयितुं महिलाप्रकोष्ठः प्रतिवर्षं स्वास्थ्यशिबिराणां आयोजनं करोति। प्रख्यातचिकित्सा विशेषज्ञः डॉ. भूमेश्वरः नटकरः एवं दन्तविशेषज्ञः डॉ. स्नेहलः नटकरः उपस्थितानां रोगिणां सफलतापूर्वकं शमनं कृतम्। अस्मिन् शिबिरे २०० तः अधिकाः कर्मचारिणः लाभान्विताः अभवन् । कुलपति प्रो. हरेरामः त्रिपाठी एवं कुलसचिवः डॉ. देवानन्दः शुक्लः अपि स्वास्थ्यपरीक्षणं अकारयताम्। कुलपतिना सर्वे कर्मचारिणः एतादृशानां स्वास्थ्य-उपक्रमानाम् लाभं ग्रहीतुं प्रोत्साहिताः तथा च डॉ. मेश्रामायाः स्वास्थ्य-जागरूकता-शिबिरस्य प्रशंसा कृता। कुलसचिवः डॉ. शुक्लः स्वास्थ्यसेवायाः महत्त्वं प्रकाशयन् सर्वेभ्यः स्वस्वास्थ्यं प्राथमिकताम् अददत् इति आग्रहं कृतवान्।

# ललितपुरे नेहरूमहाविद्यालये संस्कृतसंगोष्ठी अभवत्



**हिमसंस्कृतवार्ताः- आचार्यदीनदयाल-शुक्लः, ललितपुरम्।**
उत्तरप्रदेश- सर्वकारस्य भाषाविभागः, उत्तरप्रदेशसंस्कृतसंस्थानं लखनऊ, संस्कृतविभागः, ललितपुरस्य नेहरू महाविद्यालय- समयुक्ताश्रयेन् एकदिवसीया संगोष्ठी आयोजिता। तस्याः विषयः "संस्कृतसाहित्यस्य सांस्कृतिक- सामाजिक- योगदाने" संस्कृतभाषाविषये एकदिवसीयां राष्ट्रियसंगोष्ठीम् आयोज्य, उपर्युक्तावश्यकतानुसारं, युवानां आवश्यकतानुसारमेव वेदसाहित्ये लिखितम्। अस्माभिः उपनिषद् इति दर्शनम्। शास्त्रं, पुराणं, महाकाव्यं रामायणं, महाभारतम्, आयुर्वेदः, ध्वनिशास्त्रं, भूविज्ञानं, धर्मशास्त्रं, नीतिशास्त्रं, काव्यानां परिचयं करणीयमेव। संगोष्ठ्याः उद्घाटनं महाविद्यालयस्य प्रबन्धकः प्रदीपचौबे मातुः सरस्वत्याः आराधना, आगंतुकविदुषां च सम्मानेनाकरोत्। कार्यक्रमे मुख्यातिथिरूपेण हरगोविन्दकुशवाहा अखिलभारतीयः उपाध्यक्षः बौद्धसंस्थानं समुपस्थिताः आसन्। अस्याः गोष्ठ्याः समन्वयकत्वेन उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रतिनिधि-भूतत्वेन संस्थानस्य पूर्वसदस्यः, श्रीवामदेव-संस्कृत- महाविद्यालय- बांदाजनपदस्य सहायकव्याकरणविभागाध्यक्षः, संस्कृतभारती कानपुरप्रान्तस्य सहप्रान्तसङ्घटनमन्त्रित्वेन सुरभारतीसमाराधकाः डॉ. रत्नेशत्रिवेदीवर्यः समागतः। अस्याः संगोष्ठ्याः अध्यक्षतां महाविद्यालयस्य प्राचार्यः कृतवान्। प्रो. डॉ. ओमप्रकाशशास्त्रिणा सर्वेषां कृते आभारं प्रकटितवान्। गोष्ठ्याम् अस्याम् महाविद्यालयस्य विविधविभागीयाः अध्यक्षा- महाविद्यालयस्य सर्वे सहायकाध्यापकाः छात्राः अन्ये अध्यापकाः अध्यापिकाः चोपस्थिता आसन्। महाद्यालये एतादृशः संस्कृतकार्यक्रमं दृष्ट्वा सर्वे नन्दिताः आनन्दिताश्चासन्।

हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

## *सामान्यज्ञानम्*

प्रश्नः 1. चेन्नई- अंतरराष्ट्रीय विमानपत्तनम् कुत्र अस्ति?
उत्तरम् : चेन्नई (तमिलनाडुराज्ये)।
प्रश्नः 2. 'नागानन्दः' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'हर्षः'।
प्रश्नः 3. 'ग्रामे इति' इत्यस्य समस्त पदं किम्?
उत्तरम्- 'अधिग्रामम्'। (अव्ययीभावः)
प्रश्नः 4. 'रत्नाकरः' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'रत्न + आकरः'।
प्रश्नः 5. थलसेनादिवसः कदा भवति?
उत्तरम् – जनवरीमासस्य पञ्चदशदिनांके।

## "लौकिकन्यायकोशः"
## "गुडजिह्विकान्यायः"

किमपि कटु औषधं दातव्यं चेत् आदौ गुडं जिह्वायां स्थापयित्वा पश्चात् तत् कटु औषधं स्थापनीयम्। तेन तदौषधस्य कटुत्वं न भाति। एवं कस्यापि अप्रियस्य वस्तान्तस्य वेदनां साहयितुम् आदौ प्रियवार्ता श्राव्यते इति अनेन बोध्यते।

-डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# आमलकी एकादशी माहात्म्यम्




आमलकी शास्त्रेषु गङ्गावत् श्रेष्ठस्थानं प्राप्तवती। विष्णुनाऽपि सर्वदेवानां मध्ये श्रेष्ठत्वं प्राप्तं। यदा श्रीविष्णुनाऽस्माकं सृष्टेः सृजनाय ब्रह्मा सृष्टः, तदा स एव आमलकीवृक्षं सृजत्। विष्णुना तं आदिवृक्षत्वेन प्रतिष्ठापितं। अस्य सर्वेषु अङ्गेषु ईश्वरस्य स्थितिः मता। श्रीविष्णुनाऽपि प्रोक्तं यः स्वर्गमोक्षयोः प्राप्तिं इच्छति, तेन फाल्गुनमासस्य शुक्लपक्षे या पुष्यनक्षत्रयुक्ता एकादशी सा व्रतं कर्तव्या। एषा एव आमलकी-एकादशी इति प्रसिद्धा।

## आमलकी एकादशी व्रतविधिः

स्नानं कृत्वा श्रीविष्णोः प्रतिमां पुरतः तिलान्, कुशं, मुद्रां, जलं च गृहीत्वा संकल्पः कर्तव्यः- "अहं श्रीविष्णुप्रीत्यर्थं मोक्षार्थं च आमलकी-एकादशी- व्रतं करिष्ये। श्रीहरिः मां शरणं ग्रहीतु यथा मे व्रतं सफलं भवेत्।"
संकल्पानन्तरं षोडशोपचारैः भगवान् पूज्यः। ततः पूजनसामग्रीं गृहीत्वा आमलकीवृक्षस्य पूजनं कुर्यात्। सर्वप्रथमं वृक्षस्य चारिप्रदेशं शुद्धीकृत्य, गोमयेन पवित्रं कुर्यात्। वृक्षस्य मूले वेदीं निर्माय तत्र कलशं स्थापयेत्। कलशे देवान्, तीर्थानि, सागरं च आवाह्य, सुगन्धिद्रव्याणि पञ्चरत्नानि च स्थापयेत्। पञ्चपल्लवांश्च तस्योपरि निवेशयेत्। ततः दीपं प्रज्वालयेत्। श्रीखंडचन्दनेन कलशस्य कण्ठं लेपयित्वा वस्त्रं धारयेत्। कलशोपरि श्रीविष्णोः षष्ठमावतारस्य परशुरामस्य स्वर्णमूर्तिं स्थापयित्वा विधिवत् परशुरामपूजनं कुर्यात्। रात्रौ भगवद्गीतापाठं, भजनकीर्तनं च कृत्वा प्रभुस्मरणं कुर्यात्।
द्वादश्यां दिने ब्राह्मणाय भोजनं दत्वा दक्षिणां च दद्यात्। ततः परशुराममूर्तिं सहितं कलशं ब्राह्मणाय दत्त्वा परायणं कुर्यात्। पश्चात् अन्नं जलं च ग्रहणं कुर्यात्।

## आमलकी एकादशी व्रतकथा

अष्टाशीतिसहस्रर्षिभ्यः सूतजीरुवाच- "हे विप्राः! पुराकाले मान्धाता नाम राजा वशिष्ठं प्रष्टुमुपगमत्-
'हे वशिष्ठ महाभाग! किंचिद् व्रतं मम श्रेयसे भवेत्, तादृशं व्रतं ब्रूहि यतो मे कल्याणं भवेत्।'
वशिष्ठ उवाच- 'हे राजन्! सर्वव्रतेभ्यः उत्तमं, मोक्षदं च व्रतं आमलकी-एकादशी इति।' राजा मान्धाता उवाच- 'हे ऋषे! आमलकी-एकादश्याः उत्पत्तिः कथं जाता? अस्य व्रतस्य विधानं च किं? विस्तरेण कथय।'
वशिष्ठ उवाच- 'हे राजन्! फाल्गुनमासे शुक्लपक्षे एषा एकादशी भविष्यति। अस्य व्रतस्य महिम्ना सर्वे पापाः नश्यन्ति। अस्य पुण्यं सहस्रगवां दानफलतुल्यम्।'
'प्राचीनकाले वैदिकनामकं नगरम् आसीत्। तत्र ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राः च सम्यक् वसन्ति स्म। तत्र वेदध्वनिः सर्वदा शृणुयात्।'
'चन्द्रवंशीयः चैत्ररथ नाम राजा तत्र राज्यं करोति स्म। सः परमधार्मिकः, विद्वान् च।'
'सर्वे प्रजाजनाः एकादशीव्रतं कुर्वन्ति स्म। फाल्गुन-शुक्ल-एकादश्यां सर्वे उपवासं चक्रुः।'
'रात्रौ जागरणं चक्रुः। तत्र बहुलिः कश्चन बहेलिः आगतः। सः महापापी, दुष्टः, हिंसकश्च।'
'सः विष्णुकथां शृण्वन् जागरणं कृतवान्। तस्य पुण्येन मृत्योरनन्तरं सः वसुरथनामकः राजा जातः।'
'सः सर्वधर्मपरायणः, सत्यवादी, विष्णुभक्तः च जातः।'
'एकदा वनं गत्वा, सः मार्गं न प्राप्नोत्। वृक्षस्य अधः सुप्तः। तदा दस्यवः तं मारितुं प्रयत्नं चक्रुः।'
'तस्य शरीरात् दिव्या देवी प्रकटिता, या दस्यून् हत्वा नष्टवती।'
'राज्ञः विचारः- "एते दस्यवः केन हताः?"'
'तदा आकाशवाणी अभवत्- "हे राजन्! विष्णोः कृपया त्वं रक्षितः।"'
'एवं आमलकी-एकादश्याः पुण्येन सः पुनः राज्यं चक्रे, सुखेन वसति स्म।'

## कथासारः

भगवान् विष्णोः कृपा सर्वकष्टनाशिनी अस्ति। तेन देवदैत्यमध्ये जयः लब्धः। आमलकी-एकादश्याः व्रतेन मोक्षः प्राप्यते।